# ॥ વૃત્રગીતા ॥

.. vRitragItA ..

sanskritdocuments.org

September 11, 2017

# .. vRitragItA ..

# ॥ વૃત્રગીતા ॥

## Sanskrit Document Information

Text title : vRitragItA

File name : vRitragiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi(sunderh at hotmail.com)

Latest update : June 2, 1998

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

अध्यायः २७०

यु

धन्या धन्या इति जनाः सर्वेऽस्मान्प्रवदन्त्युत ।
न दुःखिततरः कश्चित्पुमानस्माभिरस्ति ह ॥ १॥

लोकसम्भावितैर्दुःखं यत्प्राप्तं कुरुसत्तम ।
प्राप्य जातिं मनुष्येषु देवैरपि पितामह ॥ २॥

कदा वयं करिष्यामः संन्यासं दुःखसञ्ज्ञकम् ।
दुःखमेतच्छरीराणां धारणं कुरुसत्तम ॥ ३॥

विमुक्ताः सप्तदशभिर्हेतुभूतैश्च पञ्चभिः ।
इन्द्रियार्थैर्गुणैश्चैव अस्ताभिः प्रपितामह ॥ ४॥

न गच्छन्ति पुनर्भावं मुनयः संशितव्रताः ।
कदा वयं भविष्यामो राज्यं हित्वा परन्तप ॥ ५॥

भी

नास्त्यनन्तं महाराज सर्वं सङ्ख्यान गोचरम् ।
पुनर्भावोऽपि सङ्ख्यातो नास्ति किं चिदिहाचलम् ॥ ६॥

न चापि गम्यते राजन्नैष दोषः प्रसङ्गतः ।
उद्योगादेव धर्मज्ञ कालेनैव गमिष्यथ ॥ ७॥

ईशोऽयं सततं देही नृपते पुण्यपापयोः ।
तत एव समुत्थेन तमसा रुध्यतेऽपि च ॥ ८॥

यथाञ्जन मयो वायुः पुनर्मानः शिलं रजः ।
अनुप्रविश्य तद्वर्णो दृश्यते रञ्जयन्दिशः ॥ ९॥

तथा कर्मफलैर्देही रञ्जितस्तमसावृतः ।
विवर्णो वर्ममाश्रित्य देहेषु परिवर्तते ॥ १०॥

ज्ञानेन हि यदा जन्तुरज्ञानप्रभवं तमः ।
व्यपोहति तदा ब्रह्म प्रकाशेत सनातनम् ॥ ११॥

अयत्न साध्यं मुनयो वदन्ति
ये चापि मुक्तास्त उपासितव्याः ।

ત્વયા ચ લોકેન ચ સામરેણ
તસ્માન્ન શામ્યન્તિ મહર્ષિસઙ્ઘાઃ ॥ ૧૨॥

અસ્મિન્નર્થે પુરા ગીતં શૃણુષ્વૈક મના નૃપ ।
યથા દૈત્યેન વૃત્રેણ ભ્રષ્ટૈશ્વર્યેણ ચેષ્ટિતમ્ ॥ ૧૩॥

નિર્જિતેનાસહાયેન હૃતરાજ્યેન ભારત ।
અશોચતા શત્રુમધ્યે બુદ્ધિમાસ્થાય કેવલામ્ ॥ ૧૪॥

ભ્રષ્ટૈશ્વર્યં પુરા વૃત્રમુશના વાક્યમબ્રવીત્ ।
કચ્ચિત્પરાજિતસ્યાદ્ય ન વ્યથા તેઽસ્તિ દાનવ ॥ ૧૫॥

વ્ત્ર

સત્યેન તપસા ચૈવ વિદિત્વા સઙ્ક્ષયં હ્યહમ્ ।
ન શોચામિ ન હૃષ્યામિ ભૂતાનામાગતિં ગતિમ્ ॥ ૧૬॥

કાલસઞ્ચોદિતા જીવા મજ્જન્તિ નરકેઽવશાઃ ।
પરિદૃષ્ટાનિ સર્વાણિ દિવ્યાન્યાહુર્મનીષિણઃ ॥ ૧૭॥

ક્ષપયિત્વા તુ તં કાલં ગણિતં કાલચોદિતાઃ ।
સાવશેષેણ કાલેન સમ્ભવન્તિ પુનઃ પુનઃ ॥ ૧૮॥

તિર્યગ્યોનિસહસ્રાણિ ગત્વા નરકમેવ ચ ।
નિર્ગચ્છન્ત્યવશા જીવાઃ કાલબન્ધન બન્ધનાઃ ॥ ૧૯॥

એવં સંસરમાણાનિ જીવાન્યહમદૃષ્ટવાન્ ।
યથા કર્મ તથા લાભ ઇતિ શાસ્ત્રનિદર્શનમ્ ॥ ૨૦॥

તિર્યગ્ગચ્છન્તિ નરકં માનુષ્યં દૈવમેવ ચ ।
સુખદુઃખે પ્રિયદ્વેષ્યે ચરિત્વા પૂર્વમેવ ચ ॥ ૨૧॥

કૃતાન્તવિધિસંયુક્તં સર્વલોકઃ પ્રપદ્યતે ।
ગતં ગચ્છન્તિ ચાધ્વાનં સર્વભૂતાનિ સર્વદા ॥ ૨૨॥

ભી

કાલસઙ્ખ્યાન સઙ્ખ્યાતં સૃષ્ટિ સ્થિતિ પરાયનમ્ ।
તં ભાસમાનં ભગવાનુશનાઃ પ્રત્યભાસત ।
ભીમાન્દુષ્ટપ્રલાપાંસ્ત્વં તાત કસ્માત્પ્રભાસસે ॥ ૨૩॥

પ્રત્યક્ષમેતદ્ભવતસ્તથાન્યેષાં મનીસિનામ્ ।
મયા યજ્જય લુબ્ધેન પુરા તપ્તં મહત્તપઃ ॥ ૨૪॥

ગન્ધાનાદાય ભૂતાનાં રસાંશ્ચ વિવિધાનપિ ।
અવર્ધં ત્રીન્સમાક્રમ્ય લોકાન્વૈ સ્વેન તેજસા ॥ ૨૫॥

જ્વાલામાલા પરિક્ષિપ્તો વૈહાયસચરસ્તથા ।
અજેયઃ સર્વભૂતાનામાસં નિત્યમપેતભીઃ ॥ ૨૬॥

ઐશ્વર્યં તપસા પ્રાપ્તં ભ્રષ્ટં તચ્ચ સ્વકર્મભિઃ ।
ધૃતિમાસ્થાય ભગવન્ન શોચામિ તતસ્ત્વહમ્ ॥ ૨૭॥

યુયુત્સતા મહેન્દ્રેણ પુરા સાર્ધં મહાત્મના ।
તતો મે ભગવાન્દૃષ્ટો હરિર્નારાયણઃ પ્રભુઃ ॥ ૨૮॥

વૈકુણ્ઠઃ પુરુષો વિષ્ણુઃ શુક્લોઽનન્તઃ સનાતનઃ ।
મુઞ્જકેશો હરિશ્મશ્રુઃ સર્વભૂતપિતામહઃ ॥ ૨૯॥

નૂનં તુ તસ્ય તપસઃ સાવશેષં મમાસ્તિ વૈ ।
યદહં પ્રસ્તુમિચ્છામિ ભવન્તં કર્મણઃ ફલમ્ ॥ ૩૦॥

ઐશ્વર્યં વૈ મહદ્બ્રહ્મન્કસ્મિન્વર્ણે પ્રતિષ્ઠિતમ્ ।
નિવર્તતે ચાપિ પુનઃ કથમૈશ્વર્યમુત્તમમ્ ॥ ૩૧॥

કસ્માદ્ભૂતાનિ જીવન્તિ પ્રવર્તન્તેઽથ વા પુનઃ ।
કિં વા ફલં પરં પ્રાપ્ય જીવસ્તિષ્ઠતિ શાશ્વતઃ ॥ ૩૨॥

કેન વા કર્મણા શક્યમથ જ્ઞાનેન કેન વા ।
બ્રહ્મર્ષે તત્ફલં પ્રાપ્તું તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૩૩॥

ઇતીદમુક્તઃ સ મુનિસ્તદાનીં
પ્રત્યાહ યત્તચ્છૃણુ રાજસિંહ ।
મયોચ્યમાનં પુરુષર્ષભ ત્વમ્
અનન્યચિત્તઃ સહ સોદરીયૈઃ ॥ ૩૪॥

ઉશનસ્

નમસ્તસ્મૈ ભગવતે દેવાય પ્રભવિષ્ણવે ।
યસ્ય પૃથ્વી તલં તાત સાકાશં બાહુગોચરમ્ ॥ ૧॥

મૂર્ધા યસ્ય ત્વનન્તં ચ સ્થાનં દાનવ સત્તમ ।
તસ્યાહં તે પ્રવક્ષ્યામિ વિષ્ણોર્માહાત્મ્યમુત્તમમ્ ॥ ૨॥

ભી

તયોઃ સંવદતોરેવમાજગામ મહામુનિઃ ।
સનત્કુમારો ધર્માત્મા સંશય છેદનાય વૈ ॥ ૩॥

સ પૂજિતોઽસુરેન્દ્રેણ મુનિનોશનસા તથા ।
નિષસાદાસને રાજન્મહાર્હે મુનિપુઙ્ગવઃ ॥ ૪॥

તમાસીનં મહાપ્રાજ્ઞમુશના વાક્યમબ્રવીત્ ।
બ્રૂહ્યસ્મૈ દાનવેન્દ્રાય વિન્સોર્માહાત્મ્યમુત્તમમ્ ॥ ૫॥

સનત્કુમારસ્તુ તતઃ શ્રુત્વા પ્રાહ વચોઽર્થવત્ ।
વિષ્ણોર્માહાત્મ્ય સંયુક્તં દાનવેન્દ્રાય ધીમતે ॥ ૬॥

શૃણુ સર્વમિદં દૈત્ય વિન્સોર્માહાત્મ્યમુત્તમમ્ ।
વિષ્ણૌ જગત્સ્થિતં સર્વમિતિ વિદ્ધિ પરન્તપ ॥ ૭॥

સૃજત્યેષ મહાબાહો ભૂતગ્રામં ચરાચરમ્ ।
એષ ચાક્ષિપતે કાલે કાલે વિસૃજતે પુનઃ ।
અસ્મિન્ગચ્છન્તિ વિલયમસ્માચ્ચ પ્રભવન્ત્યુત ॥ ૮॥

નૈષ દાનવતા શક્યસ્તપસા નૈવ ચેજ્યયા ।
સમ્પ્રાપ્તુમિન્દ્રિયાણાં તુ સંયમેનૈવ શક્યતે ॥ ૯॥

બાહ્યે ચાભ્યન્તરે ચૈવ કર્મણા મનસિ સ્થિતઃ ।
નિર્મલી કુરુતે બુદ્ધ્યા સોઽમુત્રાનન્ત્યમશ્નુતે ॥ ૧૦॥

યથા હિરણ્યકર્તા વૈ રૂપ્યમગ્નૌ વિશોધયેત્ ।
બહુશોઽતિપ્રયત્નેન મહતાત્મ કૃતેન હ ॥ ૧૧॥

તદ્વજ્જાતિશતૈર્જીવઃ શુધ્યતેઽલ્પેન કર્મણા ।
યત્નેન મહતા ચૈવાપ્યેકજાતૌ વિશુધ્યતે ॥ ૧૨॥

લીલયાલ્પં યથા ગાત્રાત્પ્રમૃજ્યાદાત્મનો રજઃ ।
બહુ યત્નેન મહતા દોષનિર્હરનં તથા ॥ ૧૩॥

યથા ચાલ્પેન માલ્યેન વાસિતં તિલસર્ષપમ્ ।
ન મુઞ્ચતિ સ્વકં ગન્ધં તદ્વત્સૂક્ષ્મસ્ય દર્શનમ્ ॥ ૧૪॥

તદેવ બહુભિર્માલ્યૈર્વાસ્યમાનં પુનઃ પુનઃ ।
વિમુઞ્ચતિ સ્વકં ગન્ધં માલ્યગન્ધેઽવતિષ્ઠતિ ॥ ૧૫॥

એવં જાતિશતૈર્યુક્તો ગુણૈરેવ પ્રસઙ્ગિષુ ।
બુદ્ધ્યા નિવર્તતે દોષો યત્નેનાભ્યાસજેન વૈ ॥ ૧૬॥

કર્મણા સ્વેન રક્તાનિ વિરક્તાનિ ચ દાનવ ।
યથા કર્મવિશેષાંશ્ચ પ્રાપ્નુવન્તિ તથા શૃણુ ॥ ૧૭॥

યથા ચ સમ્પ્રવર્તન્તે યસ્મિંસ્તિષ્ઠન્તિ વા વિભો ।
તત્તેઽનુપૂર્વ્યા વ્યાખ્યાસ્યે તદિહૈકમનાઃ શૃણુ ॥ ૧૮॥

અનાદિ નિધનં શ્રીમાન્હરિર્નારાયણઃ પ્રભુઃ ।
સ વૈ સૃજતિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૧૯॥

એષ સર્વેષુ ભૂતેષુ ક્ષરશ્ચાક્ષર એવ ચ ।
એકાદશ વિકારાત્મા જગત્પિબતિ રશ્મિભિઃ ॥ ૨૦॥

પાદૌ તસ્ય મહીં વિદ્ધિ મૂર્ધાનં દિવમેવ ચ ।
બાહવસ્તુ દિશો દૈત્ય શ્રોત્રમાકાશમેવ ચ ॥ ૨૧॥

તસ્ય તેજોમયઃ સૂર્યો મનશ્ ચન્દ્રમસિ સ્થિતમ્ ।
બુદ્ધિર્જ્ઞાનગતા નિત્યં રસસ્ત્વાપ્સુ પ્રવર્તતે ॥ ૨૨॥

ભ્રુવોરનન્તરાસ્તસ્ય ગ્રહા દાનવ સત્તમ ।
નક્ષત્રચક્રં નેત્રાભ્યાં પાદયોર્ભૂશ્ચ દાનવ ॥ ૨૩॥

રજસ્તમશ્ચ સત્ત્વં ચ વિદ્ધિ નારાયણાત્મકમ્ ।
સોઽઽશ્રમાણાં મુખં તાત કર્મણસ્તત્ફલં વિદુઃ ॥ ૨૪॥

અકર્મણઃ ફલં ચૈવ સ એવ પરમવ્યયઃ ।
છન્દાંસિ તસ્ય રોમાણિ અક્ષરં ચ સરસ્વતી ॥ ૨૫॥

બહ્વાશ્રયો બહુ મુખો ધર્મો હૃદિ સમાશ્રિતઃ ।

સ બ્રહ્મ પરમો ધર્મસ્તપશ્ચ સદસચ્ચ સઃ ॥ ૨૬॥

શ્રુતિશાસ્ત્રગ્રહોપેતઃ ષોડશર્ત્વિક્ક્રતુશ્ચ સઃ ।
પિતામહશ્ચ વિષ્ણુશ્ચ સોઽશ્વિનૌ સ પુરન્દરઃ ॥ ૨૭॥

મિત્રશ્ચ વરુણશ્ચૈવ યમોઽથ ધનદસ્તથા ।
તે પૃથગ્દર્શનાસ્તસ્ય સંવિદન્તિ તથૈકતામ્ ।
એકસ્ય વિદ્ધિ દેવસ્ય સર્વં જગદિદં વશે ॥ ૨૮॥

નાના ભૂતસ્ય દૈત્યેન્દ્ર તસ્યૈકત્વં વદત્યયમ્ ।
જન્તુઃ પશ્યતિ જ્ઞાનેન તતઃ સત્ત્વં પ્રકાશતે ॥ ૨૯॥

સંહાર વિક્ષેપસહસ્રકોતીસ્
તિષ્ઠન્તિ જીવાઃ પ્રચરન્તિ ચાન્યે ।
પ્રજા વિસર્ગસ્ય ચ પારિમાણ્યં
વાપી સહસ્રાણિ બહૂનિ દૈત્ય ॥ ૩૦॥

વાપ્યઃ પુનર્યોજનવિસ્તૃતાસ્તાઃ
ક્રોશં ચ ગમ્ભીરતયાવગાધાઃ ।
આયામતઃ પઞ્ચશતાશ્ચ સર્વાઃ
પ્રત્યેકશો યોજનતઃ પ્રવૃત્થાઃ ॥ ૩૧॥

વાપ્યા જલં ક્ષિપ્યતિ વાલકોત્યા
ત્વહ્ના સકૃચ્ચાપ્યથ ન દ્વિતીયમ્ ।
તાસાં ક્ષયે વિદ્ધિ કૃતં વિસર્ગં
સંહારમેકં ચ તથા પ્રજાનામ્ ॥ ૩૨॥

સો જીવ વર્ગાઃ પરમં પ્રમાણં
કૃષ્ણો ધૂમ્રો નીલમથાસ્ય મધ્યમ્ ।
રક્તં પુનઃ સહ્યતરં સુખં તુ
હારિદ્ર વર્ણં સુસુખં ચ શુક્લમ્ ॥ ૩૩॥

પરં તુ શુક્લં વિમલં વિશોકં
ગતક્લમં સિધ્યતિ દાનવેન્દ્ર ।
ગત્વા તુ યોનિપ્રભવાનિ દૈત્ય
સહસ્રશઃ સિદ્ધિમુપૈતિ જીવઃ ॥ ૩૪॥

ગતિં ચ યાં દર્શનમાહ દેવો
ગત્વા શુભં દર્શનમેવ ચાહ ।
ગતિઃ પુનર્વર્ણકૃતા પ્રજાનાં
વર્ણસ્તથા કાલકૃતોઽસુરેન્દ્ર ॥ ૩૫॥

શતં સહસ્રાણિ ચતુર્દશેહ
પરા ગતિર્જીવ ગુણસ્ય દૈત્ય ।
આરોહણં તત્કૃતમેવ વિદ્ધિ
સ્થાનં તથા નિઃસરણં ચ તેષામ્ ॥ ૩૬॥

કૃષ્ણસ્ય વર્ણસ્ય ગતિર્નિકૃષ્ટા
સ મજ્જતે નરકે પચ્યમાનઃ ।
સ્થાનં તથા દુર્ગતિભિસ્તુ તસ્ય
પ્રજા વિસર્ગાન્સુબહૂન્વદન્તિ ॥ ૩૭॥

શતં સહસ્રાણિ તતશ્ચરિત્વા
પ્રાપ્નોતિ વર્ણં હરિતં તુ પશ્ચાત્ ।
સ ચૈવ તસ્મિન્નિવસત્યનીશો
યુગક્ષયે તમસા સંવૃતાત્મા ॥ ૩૮॥

સ વૈ યદા સત્ત્વગુણેન યુક્તસ્
તમો વ્યપોહન્ઘતતે સ્વબુદ્ધ્યા ।
સ લોહિતં વર્ણમુપૈતિ નીલો
મનુષ્યલોકે પરિવર્તતે ચ ॥ ૩૯॥

સ તત્ર સંહાર વિસર્ગમેવ
સ્વકર્મજૈર્બન્ધનૈઃ ક્લિશ્યમાનઃ ।
તતઃ સ હારિદ્રમુપૈતિ વર્ણં
સંહાર વિક્ષેપશતે વ્યતીતે ॥ ૪૦॥

હારિદ્ર વર્ણસ્તુ પ્રજા વિસર્ગાન્
સહસ્રશસ્તિષ્ઠતિ સઞ્ચરન્વૈ ।
અવિપ્રમુક્તો નિરયે ચ દૈત્ય
તતઃ સહસ્રાણિ દશાપરાનિ ॥ ૪૧॥

ગતીઃ સહસ્રાણિ ચ પઞ્ચ તસ્ય

ચત્વારિ સંવર્તકૃતાનિ ચૈવ ।
વિમુક્તમેનં નિરયાચ્ચ વિદ્ધિ
સર્વેષુ ચાન્યેષુ ચ સમ્ભવેષુ ॥ ૪૨॥

સ દેવલોકે વિહરત્યભીક્ષ્ણં
તતશ્ચ્યુતો માનુષતામ્ ઉપૈતિ ।
સંહાર વિક્ષેપશતાનિ ચાષ્ટૌ
મર્ત્યેષુ તિષ્ઠન્નમૃતત્વમેતિ ॥ ૪૩॥

સોઽસ્માદથ ભ્રશ્યતિ કાલયોગાત્
કૃષ્ણે તલે તિષ્ઠતિ સર્વકસ્તે ।
યથા ત્વયં સિધ્યતિ જીવલોકસ્
તત્તેઽભિધાસ્યામ્યસુરપ્રવીર ॥ ૪૪॥

દૈવાનિ સ વ્યૂહ શતાનિ સપ્ત
રક્તો હરિદ્રોઽથ તથૈવ શુક્લઃ ।
સંશ્રિત્ય સન્ધાવતિ શુક્લમેતમ્
અસ્તાપરાનર્ચ્યતમાન્સ લોકાન્ ॥ ૪૫॥

અષ્ટૌ ચ ષષ્ટિં ચ શતાનિ યાનિ
મનો વિરુદ્ધાનિ મહાદ્યુતીનામ્ ।
શુક્લસ્ય વર્ણસ્ય પરા ગતિર્યા
ત્રીણ્યેવ રુદ્ધાનિ મહાનુભાવ ॥ ૪૬॥

સંહાર વિક્ષેપમનિષ્ટમેકં
ચત્વારિ ચાન્યાનિ વસત્યનીશઃ ।
સસ્થસ્ય વર્ણસ્ય પરા ગતિર્યા
સિદ્ધા વિશિષ્ટસ્ય ગતક્લમસ્ય ॥ ૪૭॥

સપ્તોત્તરં તેષુ વસત્યનીશઃ
સંહાર વિક્ષેપશતં સશેષમ્ ।
તસ્માદુપાવૃત્ય મનુષ્યલોકે
તતો મહાન્માનુષતામ્ ઉપૈતિ ॥ ૪૮॥

તસ્માદુપાવૃત્ય તતઃ ક્રમેણ
સોઽગ્રે સ્મ સન્તિષ્ઠતિ ભૂતસર્ગમ્ ।

સ સપ્તકૃત્વશ્ચ પરૈતિ લોકાન્
સંહાર વિક્ષેપકૃતપ્રવાસઃ ॥ ૪૯॥

સપ્તૈવ સંહારમુપપ્લવાનિ
સમ્ભાવ્ય સન્તિષ્ઠતિ સિદ્ધલોકે ।
તતોઽવ્યયં સ્થાનમનન્તમેતિ
દેવસ્ય વિષ્ણોરથ બ્રહ્મણશ્ ચ ।
શેષસ્ય ચૈવાથ નરસ્ય ચૈવ
દેવસ્ય વિષ્ણોઃ પરમસ્ય ચૈવ ॥ ૫૦॥

સંહાર કાલે પરિદગ્ધ કાયા
બ્રહ્માણમાયાન્તિ સદા પ્રજા હિ ।
ચેષ્ટાત્મનો દેવગણાશ્ ચ સર્વે
યે બ્રહ્મલોકાદમરાઃ સ્મ તેઽપિ ॥ ૫૧॥

પ્રજા વિસર્ગં તુ સશેષકાલં
સ્થાનાનિ સ્વાન્યેવ સરન્તિ જીવાઃ ।
નિઃશેષાણાં તત્પદં યાન્તિ ચાન્તે
સર્વાપદા યે સદૃશા મનુષ્યાઃ ॥ ૫૨॥

યે તુ ચ્યુતાઃ સિદ્ધલોકાત્ક્રમેણ
તેષાં ગતિં યાન્તિ તથાનુપૂર્વ્યા ।
જીવાઃ પરે તદ્બલવેષરૂપા
વિધિં સ્વકં યાન્તિ વિપર્યયેન ॥ ૫૩॥

સ યાવદેવાસ્તિ સશેષભુક્તે
પ્રજાશ્ચ દેવ્યૌ ચ તથૈવ શુક્લે ।
તાવત્તદા તેષુ વિશુદ્ધભાવઃ
સંયમ્ય પઞ્ચેન્દ્રિય રૂપમેતત્ ॥ ૫૪॥

શુદ્ધાં ગતિં તાં પરમાં પરૈતિ
શુદ્ધેન નિત્યં મનસા વિચિન્વન્ ।
તતોઽવ્યયં સ્થાનુમુપૈતિ બ્રહ્મ
દુષ્પ્રાપમભ્યેતિ સ શાશ્વતં વૈ ।
ઇત્યેતદાખ્યાતમહીનસત્ત્વ

નારાયણસ્યેહ બલં મયા તે ॥ ૫૫॥

વ્ર

એવઙ્ગતે મે ન વિષાદોઽસ્તિ કશ્ ચિત્
સમ્યક્ચ પશ્યામિ વચસ્તવૈતત્ ।
શ્રુત્વા ચ તે વાચમદીનસત્ત્વ
વિકલ્મષોઽસ્મ્યદ્ય તથા વિપાપ્મા ॥ ૫૬॥

પ્રવૃત્તમેતદ્ભગવન્મહર્ષે
મહાદ્યુતેશ્ચક્રમનન્વ વીર્યમ્ ।
વિષ્ણોરનન્તસ્ય સનાતનં તત્
સ્થાનં સર્ગા યત્ર સર્વે પ્રવૃત્તાઃ ।
સ વૈ મહાત્મા પુરુષોત્તમો વૈ
તસ્મિઞ્જગત્સર્વમિદં પ્રતિષ્ઠિતમ્ ॥ ૫૭॥

ભી

એવમુક્ત્વા સ કૌન્તેય વૃત્રઃ પ્રાનાનવાસૃજત્ ।
યોજયિત્વા તથાત્માનં પરં સ્થાનમવાપ્તવાન્ ॥ ૫૮॥

યુ

અયં સ ભગવાન્દેવઃ પિતામહ જનાર્દનઃ ।
સનત્કુમારો વૃત્રાય યત્તદાખ્યાતવાન્પુરા ॥ ૫૯॥

ભી

મૂલસ્થાયી સ ભગવાન્સ્વેનાનન્તેન તેજસા ।
તત્સ્થઃ સૃજતિ તાન્ભાવાન્નાનારૂપાન્મહાતપઃ ॥ ૬૦॥

તુરીયાર્ધેન તસ્યેમં વિદ્ધિ કેશવમચ્યુતમ્ ।
તુરીયાર્ધેન લોકાંસ્ત્રીન્ભાવયત્યેષ બુદ્ધિમાન્ ॥ ૬૧॥

અર્વાક્સ્થિતસ્તુ યઃ સ્થાયી કલ્પાન્તે પરિવર્તતે ।
સ શેતે ભગવાનપ્સુ યોઽસાવતિબલઃ પ્રભુઃ ।
તાન્વિધાતા પ્રસન્નાત્મા લોકાંશ્ચરતિ શાશ્વતાન્ ॥ ૬૨॥

સર્વાણ્યશૂન્યાનિ કરોત્યનન્તઃ
સનત્કુમારઃ સઞ્ચરતે ચ લોકાન્ ।

સ ચાનિરુદ્ધઃ સૃજતે મહાત્મા
તત્સ્થં જગત્સર્વમિદં વિચિત્રમ્ ॥ ૬૩॥

યુ

વૃત્રેણ પરમાર્થજ્ઞ દૃષ્ટા મન્યેઽઽત્મનો ગતિઃ ।
શુભા તસ્માત્સ સુખિતો ન શોચતિ પિતામહ ॥ ૬૪॥

શુક્લઃ શુક્લાભિજાતીયઃ સાધ્યો નાવર્તતેઽનઘ ।
તિર્યગ્ગતેશ્ચ નિર્મુક્તો નિરયાચ્ચ પિતામહ ॥ ૬૫॥

હારિદ્રે વર્ણે રક્તે વા વર્તમાનસ્તુ પાર્થિવ ।
તિર્યગેવાનુપશ્યેત કર્મભિસ્તામસૈર્વૃતઃ ॥ ૬૬॥

વયં તુ ભૃશમાપન્ના રક્તાઃ કસ્ત મુખેઽસુખે ।
કાં ગતિં પ્રતિપત્સ્યામો નીલાં કૃષ્ણાધમામ્ અથ ॥ ૬૭॥

ભી

શુદ્ધાભિજનસમ્પન્નાઃ પાણ્ડવાઃ સંશિતવ્રતાઃ ।
વિહૃત્ય દેવલોકેષુ પુનર્માનુષ્યમેષ્યથ ॥ ૬૮॥

પ્રજા વિસર્ગં ચ સુખેન કાલે
પ્રત્યેત્ય દેવેષુ સુખાનિ ભુક્ત્વા ।
સુખેન સંયાસ્યથ સિદ્ધસઙ્ખ્યાં
મા વો ભયં ભૂદ્વિમલાઃ સ્થ સર્વે ॥ ૬૯॥

॥ ઇતિ વૃત્રગીતા સમાપ્તા ॥

Adhyaya numbers 269-270 in shAntiparva, Mahabharata critical edition (Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition they are 279-280.

Sunder Hattangadi sunderh at hotmail.com

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*